Published on: Jan, 14 2023 13:07

Sanatan Dharma

শ্রীমদ্দক্ষিণকালিকাস্তোত্রংঃ

শ্রীমদ্দক্ষিণকালিকাস্তোত্রংঃ

ওঁ কৃশোদরি মহাচণ্ডী মুক্তকেশিং বলীপ্রিয়ে। কুলাচারপ্রসন্নাস্যে নমস্তে শঙ্করপ্রিয়ে।। ঘোরদংষ্ট্রে কোটোরাক্ষি কিটিশব্দ প্রসাধিনী। ঘুরঘোররাবাস্ফারে নমস্তে চিতাবাসিনী।। বন্ধুকপুষ্পসঙ্কাশে ত্রিপুরে ভয়নাশিনী। ভাগ্যোদয়সমুৎপন্নে নমস্তে বরবন্দিনী।।
জয় দেবি জগদ্ধাত্রী ত্রিপুরাদ্যে ত্রিদেবতে। ভক্তেভ্যো বরদে দেবি মহষঘ্নি নমোহস্তুতে।। ঘোরবিঘ্নবিনাশায় কুলাচারসমৃদ্ধয়ে।
নমমি বরদে দেবি মুণ্ডমালা বিভূষনে।। রক্তধারাসমাকীর্ণে করকাঞ্চীবিভূষিতে। সর্ব্ববিঘ্নহরে কালী নমস্তে ভৈরবপ্রিয়ে।। নমস্তে দক্ষিণামূর্ত্তে কালী ত্রিপুরভৈরবী। ভিন্নাঞ্জনচয়প্রক্ষে প্রবীণশবসংস্থিতে।। গলচ্ছ্রোণিতধারাভিঃ স্মেরাননসরোরুহে। পীনোন্নতকুচদ্বন্দ্বো নমস্তে ঘোরদক্ষিণে।। আরক্তমুখশান্তাভির্নেত্রালিভির্বিরাজিতে। শবদ্বয় কৃতোত্তংসে নমস্তে মদবিহ্বলে।। পঞ্চাশন্মুণ্ডঘটিতমালা লোহিত লোহিতে।। নানামণিবিশোভাঢ্যে নমস্তে ব্রহ্মসেবিতে।। শবাস্থিকৃতকেয়ুর, শঙ্খ-কঙ্কন-মণ্ডিতে। শববক্ষঃ সমারুঢ়ে নমস্তে বিষ্ণুপূজিতে।। শবমাংস কৃতগ্রাসে অট্টহাসে মুহুর্মুহু। মুখশীঘ্রস্মিতামোদে নমস্তে শিববন্দিতে।। খড়্গমুণ্ডধরে বামে সব্যে (অ) ভয়বরপ্রদে। দন্তুরে চ মহারৌদ্রে নমস্তে চণ্ডনাদিতে।। ত্বং গতিঃ পরমা দেবি ত্বং মাতা পরমেশ্বরী। ত্রাহি মাং করুণাসাদ্রে নমস্তে চণ্ডনায়িকে।। নমস্তে কালিকে দেবি নমস্তে ভক্তবৎসলে। মুর্খতাং হর মে দেবি প্রতিভা জয়দায়িনী।। গদ্যপদ্যময়ীং বাণীং তর্কব্যাকরণাদিকম্। অনধীতগতাং বিদ্যাং দেহি দক্ষিণকালিকে।।
জয়ং দেহি সভামধ্যে ধনং দেহি ধনাগমে।
দেহি মে চিরজীবিত্বং কালিকে রক্ষ দক্ষিণে।। রাজ্যং দেহি যশো দেহি পুত্রান্ দারান্ ধনং তথা। দেহান্তে দেহি মে মুক্তিং জগন্মাতঃ প্রসীদ মে।। ওঁ মঙ্গলা ভৈরবী দুর্গা কালিকা ত্রিদশেশ্বরী।

Published on: Jan, 14 2023 13:07

উমা হৈমবতীকন্যা কল্যাণী ভৈরবেশ্বরী।।
কালী ব্রাহ্মী চ মাহেশী কৌমারী বৈষ্ণবী তথা। বারাহী বাসলী চণ্ডী ত্বাং জগুর্ম্মুনয়ঃ সদা।। উগ্রতারেতি তারেতি শিবত্যেকজটেতি চ। লোকোত্তরেতি কালেতি গীয়তে কৃতিভিঃ সদা।। যথা কালী তথা তারা তথা ছিন্না চ কুল্লকা। একমূর্ত্তিশ্চতুর্ভেদ দেবি ত্বং কালিকা পুরা।। একত্রিবিধা দেবী কোটিধানন্তরূপিনী। অঙ্গাঙ্গিকৈর্নামভেদৈঃ কালিকেতি প্রগীয়তে।
শম্ভুঃ পঞ্চমুখেনৈব গুণান্ বক্তুং ন তে ক্ষমঃ।
চাপল্যৈর্যৎ কৃতং স্তোত্রং ক্ষমস্ব বরদা ভব।।
প্রাণান্ রক্ষ যশো রক্ষ পুত্রান্ দারান্ ধনং তথা।
সর্ব্বকালে সর্ব্বদেশে পাহি মাং দক্ষিণকালিকে।।
যঃ সংপূজ্য পঠেৎ স্তোত্রং দিবা বা রাত্রিসন্ধ্যায়োঃ।
ধনং ধান্যং তথা পুত্রং লভতে নাত্র সংশয়।।

শ্রীমন্মহাকালবিরচিত শ্রীমদ্দক্ষিণকালিকাস্তোত্রং সম্পূর্ণম্।।